National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 163-166
© 2026 NJHSR
www.sanskritarticle.com

**सन्तोषी महापात्रः**
विद्यावारिधिः, शोधच्छात्री,
न्यायदर्शनविभागः
श्रीजगन्नाथ संस्कृत विश्वविद्यालयः,
श्रीविहार, पुरी।

**Correspondence:**
**सन्तोषी महापात्रः**
विद्यावारिधिः, शोधच्छात्री,
न्यायदर्शनविभागः
श्रीजगन्नाथ संस्कृत विश्वविद्यालयः,
श्रीविहार, पुरी।

# मीमांसा-वेदान्त-सांख्याभिमत अवयवत्रयवादपरम्पराविमर्शः

**सन्तोषी महापात्रः**

अवयवानां मतभेदसम्पर्के कथ्यते यत्-तत्र उपनयोदाहरणरूपम् अवयवद्वमित्ये। एक इति। बौद्धा इत्यर्थः। प्रतिज्ञाहेतूदाहरणम् अवयवत्रयम् इति अन्ये। अन्य इति। मीमांसका इत्यर्थः। प्रतिज्ञादि-पञ्चकमिति अपरे। प्रतिज्ञादि इत्यत्र आदिशब्देन हेतूदाहरणोपनयनिगमनानि गृह्यन्ते। एतादात्मकं प्रतिज्ञादिपञ्चकम् इत्यर्थः। न्यायभिन्नेषु येषु येषु दर्शनेषु अवयवानाम् आलोचनं विद्यते, तेषां वर्णना अधः संक्षिप्तरूपेण दीयते यत्-

**मीमांसाभिमत अवयवत्रयवादविमर्शः**

मीमांसा नाम पूजितवेदाविचारः। मीमांसाशास्त्रे अवयवचर्चा विपुलतया न दृश्यते। मीमांसाशास्त्रस्य मुख्यग्रन्थाः तथा जैमिनीयसूत्रम्, शाबरभाष्यम् इत्यत्र प्रायः अवयवचर्चायाः अत्यन्ताभाव एव वर्त्तते। तस्य मुख्यकारणम् किमिति उपचारयामः उच्यते एवं सम्भावना भवति दृश्यते-

मीमांसाशास्त्रे प्रायः वेदोक्तमन्त्राणां विभिन्नयागेषु प्रयोगाः कथं करणीयम् विचार्यते। यस्मिन् कस्मिन्-चित्ग्रन्थे प्रमेयविचारोपि दृश्यते। परम् मीमांसाशास्त्रस्य मुख्यलक्ष्यन्तु वेदोक्तमन्त्राणाम् कथनमेवा।

तथापि कुमारिलभट्ट, पार्थसारथिमिश्र, मानमेयोदयकार, श्रीनारायणभट्ट, प्रभाकर, शालिकनाथ प्रभृतिभिः मीमांसकैः त्रै एव अवयव अङ्गी कृता इति सुनिश्चितं एतत्। कुमारिलभट्टेन अपि त्रयाणाम् एव अवयवाणां सविस्तरं वर्णनं कृतम्। तेषाम् अयं आशयः-प्रतिज्ञा हेतुः उदाहरणानि अथवा उदाहरण उपनय निगमनानि इमे आद्यन्तवन्त स्त्रय एव अवयव आवश्यक।

मानमेयोदय ग्रन्थोक्ता अवयवानां विचारः यथा अस्ति किञ्चित् अत्र निरुप्यते।

अनुमानं द्विविधं स्वार्थपरार्थभेदेन। परस्तस्य मध्यस्तस्य संशयनिवृत्ति अस्मात् तत् परार्थानुमानः। स्वानुमिति हेतुः स्वार्थाऽनुमानम्।

**यदा पुनः स एवार्थः परवाक्येन बोध्यते।**
**तदा परार्थमित्याहुस्तयोरेतावती भिदा।।**

तत्र परार्थानुमानवाक्यं पञ्चावयवमिति तार्किकाः प्रतिज्ञाहेतूदाहरणोपनय-निगमनान्यवयवाः।" यथा-अयं पर्वतोऽग्निमान्, धूमत्वात्, यो यो धूमवान् स सोऽग्नि-मान्, यथा महानसः धूमवांश्चायम्, तस्माद् अग्निमानेव इति। लिङ्गवचनं हेतुः, धूमवत्वात् इति। व्याप्ति प्रदर्शनपुरःसरं दृष्टान्तम् अभिधानम् उदाहरणम्, यो यो धूमवान्, स सोऽग्निमान् यथा महानसः इति। सिध्यव्याप्तिकस्य पक्षे उपनयनम् उपनयः, धूमवांश्चायम् इति। सहेतुकं पक्षस्य पुनर्वचनं निगमनम्। तस्मान् अग्निमान इति। यथा-

**प्रतिज्ञाय निगमनं हेतुनोपनयस्तथा।**
**गतार्थं इति कः कुर्यात्पञ्चावयवघोषणम्।।**
**तस्मात् त्र्यवयवं ब्रूमः पौनरुक्त्यासहा वयम्।**
**उदाहरणपर्यन्तं यद्वोदाहरणादिकम्।।**

यो धूमवान्, सोऽग्निमान्, यथा- महानसः। धूमवांश्चायम्-इति एतावत् उक्तौ तस्मात् अग्निमान् इति अर्थात् सिध्यति। अत उदाहरणोपनयौ द्वौ एव अवयवौ इति।

**तदपि साध्यांशे अध्याहारदोषप्रसङ्गाद् अपास्तम्।**
**तदेवं पौनरुक्त्येन तथाध्याहारदोषतः।**

**तर्कबौद्धमते हित्वा वयं त्र्यवयवे स्थिताः।।**

तत्र उदाहरणान्तं यथा- पर्वतोऽग्निमान्, धूमवत्वात्, यो धूमवान् सोऽग्निमान्, यथा- महानसः इति। उदाहरणादिकं यथा- यो धूमवान् सोऽग्निमान, यथा महानसः, धूमवांश्चायम्, तस्मात् अग्निमान इति।

**अथ प्रतिज्ञाहेत्वोश्च दृष्टान्तस्य च दूषणम्।**
**क्रमेण कथ्यतेऽस्माभिर्यद्वेद्यं वादिनां पुरः।।**

**प्रतिज्ञाभासाः** - तत्र परप्रतिपादनार्थं पक्षवचनं हि प्रतिज्ञा। जिज्ञासितधर्म-विशिष्टश्च पक्ष इत्युक्तम्। ततश्च तद्रूपपरिच्छेदात् तद्विपरीतपरिच्छेदाद् वा अन्यत्र अप्रसिद्धत्वात् वा यो न जिज्ञासितो धर्मः, तत् विशिष्टस्य न पक्षत्वम्- इति सिद्धविशेषणो बाधितविशेषणो अप्रसिद्धविशेषणश्च पक्षाभासा एवेति तदावेदकं वचनमपि प्रतिज्ञाभास एव। तद्यथा- वह्निरुष्ण इति सिद्धविशेषणः, वह्निरनुष्ण इति बाधितविशेषणः क्षित्यादिकं सर्वज्ञकर्तृकं इति अप्रसिद्धविशेषणः घटादिषु क्वचिदपि सर्वकर्तृकत्वस्य अप्रसिद्धत्वात्।

बाधकप्रमाणभेदेन बाधितविशेषणत्व अवान्तरविशेषो द्रष्टव्यः। तत्र वह्निरनुष्ण इति प्रत्यक्षबाधः पूर्वमुक्तः। अनुमानस्यापि यदा प्रबलत्वं स्पष्टं भवति तदानुमानबधः, यथा- मन इन्द्रियं न भवति, अभूतात्मकत्वात् दिगादिवद् इति। अत्र इन्द्रियत्वेन मनसो अनुमीयमानत्वात् मनोधर्मिग्राहकेणैव अनुमानेन तस्यानिन्द्रियत्वं बाधितम्। अत एव शीघ्रभाविनाम् अनुमानानां सर्वत्र बाधकत्वं द्रष्टव्यम्।

शाब्दबोधो यथा-यागादयः स्वर्गसाधनं न भवन्ति, क्रियात्वाद्, गमनवद् इति। अत्र स्वर्गकामयोजेत इत्यादिवाक्यैः यागादेः स्वर्गसाधनत्वबोधनात् तद्भावः शाब्द-बोधितः। यथा वा स्पृश्यांनरास्थि प्राण्यङ्गत्वात् शङ्खवद् इति।

गौर्गवयसदृशो न भवति, प्राणित्वाद्, पुरुषवद्- इत्यत्र उपमानबाधः। देवदत्तो बहिः नास्ति तत्र अदृश्यमानत्वात् इत्यत्र अर्थापत्तिबाधः, अर्थापत्त्या बहिर्भावस्य बाधितत्वात्। रूपवान् वायुः, द्रव्यत्वात्, पृथिवीवत् इत्यत्र अनुपलम्भबाधः इति।

**वेदान्ताभिमत अवयवत्रयवादविमर्शः**

प्रत्यक्ष-अनुमान-उपमान-आगम-अर्थापत्ति-अनुपलब्धेति षट्विधानि प्रमाणानि सन्ति इति अद्वैतवेदान्तिना अङ्गीक्रियते। तत्र अनुमानप्रमाणः मुख्यप्रमाणत्वेन स्वीक्रियते। तत्र अनुमितिकरण-मनुमानम् इति। तत् च अनुमानं स्वार्थपरार्थभेदेन द्विविधम्। तत्र किं नाम स्वार्थानुमानमिति कथ्यते चेत् स्वस्यानुमितिरूपप्रयोजनं यस्मात् व्याप्तिज्ञानात् भवति इति तत् स्वार्थमिति। स्वयं बुद्ध्या पश्चात् परो बोधनीय इति स्वार्थस्य प्रथममुद्देश्यः। अनन्तरं परार्थस्येति। पुनश्च किं नाम परार्थानुमानमिति प्रश्नसमुत्पन्ने सति उच्यते यत् परस्यानुमिति-रूपप्रयोजनं यस्मात् भवति तदभिप्रेत्य तयोः भेदं भवति परार्थानुमानम् इति। न्यायो नाम अवयवसमुदायः। अवयवाश्च त्रय एव प्रतिज्ञाहेतुरूदाहरणरूपाः। उदाहरणोपनय-निगमनरूपा वा। न तु पञ्चावयवाः। अवयव-त्रयेण व्याप्तिपक्षधर्म-तयोरुपदर्शनसम्भवेन अवयवद्वयस्य व्यर्थत्वात्। एवमनुमाने निरूपिते ब्रह्मभिन्ननिखिल-मिथ्यात्वसिद्धिः। तथाहि-ब्रह्मभिन्नं सर्वं मिथ्या ब्रह्मभिन्नत्वात्। यदेवं तदेवं यथा शुक्तिरूप्यम्। न च दृष्टान्तासिद्धिः। तस्य बाधितत्वात्।

"त्रीनुदाहरणान्तान् वा यद्वोदाहरणादिकान्" इति भट्टपादैः कथितम्। एवं निरूपितस्य अनुमानस्य प्रयोजनं विषये उच्यते यत् एवेति। ब्रह्मभिन्नेति। अस्यार्थो भवति ब्रह्मभिन्नाशेषप्रपञ्चस्य मिथ्यात्वसिद्धिः इत्यर्थः। परन्तु किं ब्रह्मभिन्नत्वमात्रं पक्षतावच्छेद-कम्, अथवा ब्रह्मज्ञान इतर अबाध्यत्वविशेषितम् इति प्रश्नमायाति। शुक्तिरूप्यादौ सिद्धसाधनत्वात् ब्रह्मभिन्नत्वमात्रं पक्षतावच्छेदकम् इति मतं न सिद्धम्। पक्षतावच्छेदक-सामानाधिकरण्येन प्रागेव साध्यसिद्धेः इति कारणात् द्वितीयपक्षमपि न सिद्धम्। ब्रह्मज्ञाने अव्यवहितभ्रमे सिद्धसाधनात् उच्यते यत् तथा च पक्षतावच्छेदकावच्छिन्ने साध्यसिध्येः उद्देश्यत्वात् तत् असिद्धेः न प्रातिभासिकरजतादौ सिद्धसाधनमिति भावः। वस्तुतस्तु ब्रह्मज्ञान इतरबाध्यत्व अयोग्यत्वस्य पक्षविशेषणत्वेन प्रातिभासिकरजतादेश्च तत् योग्यत्वात् न सिद्धसाधनमिति ध्येयम्। ब्रह्मणः पक्षत्वे अंशतो बाधः स्यात् इति ब्रह्मभिन्नमिति युक्तम्। शुक्तिरूप्यमिति। आरोपितजगतमित्यर्थः। तस्येति। परन्तु प्रातिभासिकरजतत्वा-दिकमेव दृष्टान्ते मिथ्यातप्रयोजकं, न तु ब्रह्मभिन्नत्वमिति आशङ्कायाम् उच्यते यत् नास्ति इति। ब्रह्मभिन्नत्वस्य सकलभ्रमसाधारणत्वात् इति भावः। मिथ्यात्वं च स्वाश्रयत्वेन अभिमत यावत् वस्तुनिष्ठात्यन्ताभावप्रतियोगित्वम्। अभिमतपदं वस्तुतः स्वाश्रयाप्रसिद्धि असम्भववारणाय। यावत् पदम् अर्थान्तर-वारणाय। तदुक्तं[1]-

**"सर्वेषामपि भावानां स्वाश्रयत्वेन सम्मते।**
**प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता।।"**

इति। यद्वा अयं पट एतत् तन्तुनिष्ठात्यन्ताभावप्रतियोगि। पटत्वात् पटान्तरवत् इति अनुमानं मिथ्यात्वे प्रमाणम्। तदुक्तम्[2]-

**"अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः।**
**अंशित्वादितरांशीव दिगेषैव गुणादिषु।।"** इति।

न च घटादेः मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधः। अधिष्ठानब्रह्मसत्ताया एव तत्र विषयतया तत्र पटादेः सत्यत्वसिद्धे। न च नीरूपब्रह्मणः कथं चाक्षुषादिज्ञान-विषयतेति वाच्यम्। नीरूपस्यापि रूपादेः प्रत्यक्षविषयत्वात्। न च नीरूपस्य द्रव्यस्य चक्षुराद्योयोग्यत्वनियमः, मन्मते ब्रह्मणो द्रव्यत्वसिद्धेः। गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यत्वमिति ते अभिमतम्। न हि निर्गुणस्य ब्रह्मणः गुणाश्रयता। नापि समवायि-कारणता, समवायसिद्धेः।

अस्तु वा द्रव्यत्वं ब्रह्मणः। तथापि नीरूपस्य कालस्येव चाक्षुषादि-ज्ञानविषयत्वे न विरोधः। यद्वा त्रिविधं सत्त्वम्। पारमार्थिकं सत्त्वं ब्रह्मणः। व्यावहारिकं सत्त्वमाकाशादेः, प्रातिभासिकं सत्त्वं शुक्तिरूप्यादेः। तथाच घटः सन्निति प्रत्यक्षस्य व्यावहारिकसत्त्व-विषयत्वेन प्रामाण्यम्। अस्मिन् पक्षे च घटादेः ब्रह्मणि निषेधो न स्वरूपेण। किन्तु पारमार्थिकत्वेन एव इति न विरोधः। अस्मिन् पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्व अवच्छिन्नप्रतियोगिकत्वम् अत्यन्त अभावविशेषणं द्रष्टव्यम्। तस्मात् उपपन्नं मिथ्यात्वानु-मानमिति।

पुनश्च शाङ्करभाष्यानुसारं वर्णते यत्- गतिकल्पनायां च गन्ता जीवः गन्तव्यस्य ब्रह्मणः अवयवः, विकारः वा, अन्य वा ततः स्यात् ? अत्यन्ततादात्म्ये गमनानुपपत्तेः। यदि वा एवं ततः स्यात् ? उच्यते यत्- यदि एकदेशः तेन एकदेशिनः नित्यप्राप्तत्वात् न पुनः ब्रह्मगमनम् उपपद्यते। एकदेशैकदेशित्वकल्पना च ब्रह्मणि अनुपपन्ना निरवयवत्वप्रसिद्धेः। विकारपक्षे अपि एतत् तुल्यं, विकारेणापि विकारिणः नित्यप्राप्त-त्वात्। न हि घटः मृदात्मतां परित्यज्य अवतिष्ठते, परित्यागे वा अभावप्राप्तेः। विकारा-वयवपक्षयोः च तद्वतः स्थिरत्वात् ब्रह्मणः संसारगमनम् अपि अनवक्लृप्तम्। अतः अन्य एव जीवः ब्रह्मणः, सः अणुः व्यापी मध्यमपरिमाणः वा भवितुमर्हति। व्यापित्वे गमनानुपपत्तिः। मध्यमपरिमाणत्वे च अनित्यत्वप्रसङ्गः। अणुत्वे कृत्स्नशरीरवेदनानु-पपत्तिः। प्रतिषिद्धे च अणुत्वमध्यम-परिमाणत्वे विस्तरेण पुरस्तात्। परस्मात् च अन्यत्वे जीवस्य "तत्त्वमसि" इत्यादि शास्त्रबाधप्रसङ्गः। विकारावयवपक्षोः अपि समानः अयं दोषः। विकारावयवयोः तद्वतः अनन्यत्वात् अदोषः इति चेत् ? न, मुख्यैकत्वा-नुपपत्तेः। सर्वेषु एतेषु पक्षेषु अनिर्मोक्षप्रसङ्गः संसार्यात्मत्व अनिवृत्तेः निवृत्तौ वा स्वरूपनाशप्रसङ्गः। ब्रह्मात्मत्व अनभ्युपगमात्।

**सांख्याभिमत अवयववादविमर्शः**

सांख्याचार्य श्री माठरमहोदयेन पञ्चावयवनिर्देशावसरे श्रीप्रशस्तपादानामेव अनुमानं कृतम्। इयांस्तु विशेषः यदा एभिः निरुपिता त्रयो अपि अवयवा दृष्टिगोचरतां आयान्ति। पदा-हेतु-दृष्टान्तानां नामनिर्वचनं संपाद्य प्रतिज्ञा-हेतु-उदाहरणानि अपि निर्दिष्टवन्तः श्रीमाठरमहोदयाः। पञ्चावयवप्रयोगस्तु सांख्यसूत्रेषु अपि मान्यो अस्ति। ये च पञ्चावयवा गौतमानुसारं श्रीविज्ञानभिक्षुणा स्पष्टीकृताः।

सांख्यानां मतेपि अनुमानं द्वैविध्यं अङ्गीक्रियते। स्वार्थानुमानं परार्थानुमानम् इति। परस्य संशयनिवृत्तिः अस्मात् तत् परार्थानुमानम्। तत्र पञ्चावयवाः वर्त्तन्ते। इति केचन त्रिनैव अवयवाः वर्त्तन्ते इति।

तत्र त्रिविधस्य प्रमाणस्य पृथक् लक्षणम् उपन्यस्यते। विषयं विषयं प्रति योऽध्यवसायो नेत्रादीनाम् इन्द्रियाणां पञ्चानां रूपादिषु पञ्चसु। तत्प्रत्यक्षं प्रतिपत्तिरूपं दृष्टारव्यम्। "अनुमानं त्रिविधम्[३]"। त्रिसाधनं त्र्यवयवं पञ्चावयमित्यपरे। तदाख्यातं कथितम्। पक्ष हेतु दृष्टान्ता इति। त्र्यवयवम्। पक्षः प्रतिज्ञापदम्। यथा- वह्निमानयं प्रदेशः। साध्यवस्तुपन्यासः पक्षः। इतरे प्रज्ञाभासाः प्रत्यक्षविरुद्धादयो नव। त्रिरूपो हेतुः। त्रैरूप्यं पुनः पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षे चासत्त्वमिति। अत्रोदाहरणं यथा-धूमवत्त्वादिति। अन्ये हेत्वाभासाः चतुर्दश। असिद्धानैकान्तिकविरुद्धादयः। साधर्म्य-वैधर्म्याभ्यां द्विविधं निदर्शनम्। यथा महानसम्। इतरे निदर्शनाभासा दश। एवं त्रयस्त्रिंशदाभासरहितं त्र्यवयवम् अनुमानम्। पञ्चावयवमित्यपरे[४]। इत्यत्र अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः। एवं पञ्चावयवेन वाक्येन स्वनिश्चितार्थ-प्रतिपादनं परार्थप्रतिपादनं परार्थानुमानम्। तच्च त्रिविधम्। पूर्ववच्छेषवत् सामान्यतोदृष्टं च। तत्र विशिष्टमेघोन्नतिदर्शनात् भवति वृष्टिं सम्भावयति। पूर्वमियं दृष्टेति पूर्ववत्। नदीपूरदर्शनादुपरि वृष्टो देव इति वा प्रतीतिः। शेषवत् यथा समुद्रोदकविन्दुं प्राश्य, शेषस्य लवणभावोऽनुमीयते इति शेषवत्। सामान्यतोदृष्टम् पुष्पितामम्रदर्शनादन्यत्र पुष्पिता आम्रा इति। पुनर्यथा वहिनुद्योत इति केनात्युक्तं, तत्रापरेणाप्युक्तम्। चन्द्र उदितो भविष्यति इत्यर्थ सङ्गतिः। तल्लिङ्गलिङ्गिपूर्वकमिति। इत्यस्य विगणं कुर्वन्ति। लिङ्गेन त्रिदण्डादिदर्शनेना दृष्टोऽपि लिङ्गी साध्यते नूनमसौ परिब्राटस्तियस्येदं त्रिदण्डमिति।

तस्य पुनरवयवाः "जिज्ञासासंशयप्रयोजनशकयप्राप्तिसंशयव्युदास-लक्षणाश्च व्याख्याङ्गम्।" प्रतिज्ञाहेतुदृष्टान्तोपसंहारनिगमनानि परप्रतिपादनाङ्गमिति। तत्र ज्ञातुमिच्छा जिज्ञासा। पुरुषं ज्ञातुमिच्छामि। किमस्ति नास्तीति? कुतः संशय इति पर्यनुयुक्तः एवं अभिप्रायः-अनुपलभ्यमानस्योभयथा दृष्टत्वात्। इहानुपलभ्यमानमुभ यथा दृष्टम्-सद्भूतमद्भूतं चेति। सद्भूतं चार्केन्दुमण्डलापरभागादि, असद्भूतश्च शशविषाणादि। अयमपि यान्मा नोपलभ्यते। अतः संशयः किमस्ति नास्तीति ? किमस्याश्चिन्तायाः प्रयोजनमिति पृष्टो, व्याचष्टेशास्त्रसतत्त्वाधिगमः, ततश्च मोक्षावाप्तिः।

कथमिति ? यदि तावदयमात्माऽस्ति ततोऽस्य अप्रकृतित्त्वौदासीन्य-विभुत्वादिस तत्त्वविज्ञानान्नैसत्म्यभ्रान्तिविपक्षभूतादपवर्गप्राप्तिर-वश्यम्भाविनीति यदुक्तं व्यक्ताव्यक्त-विज्ञानान्मोक्षोऽव्याप्यत इति तच्छास्त्रमर्थवद्भवतीति। अथनास्तीति निश्चीयते, तेन सामान्यतोदृष्टान्तादनुमानात्तद्वदन्येऽपि पदार्था न सन्ति इति विप्रलम्भभूयिष्ठमार्षं दर्शनम-पहायात्मग्रहदृष्टिविगमाल्लोकोत्तरमव-लम्ब्यनं शून्यं ध्यानविषययमुपसम्प्राप्तस्त्रैधातु-काल्लेशनिरोध-लक्षणमात्यन्तिकं निर्वाणमवाप्स्सीतिष शक्यश्चायमर्थो निश्चेतुम्, प्रमाणत्रयपरिग्रहादिति व्यवस्थिते, व्युदस्य संशयं साध्यावाधारणं प्रतिज्ञा। साध्यास्य यदवधारणमस्ति पुरुषं इति सा प्रतिज्ञा। साध्यसमासवचनं हेतुः। साध्यते अनेन इति साधनं लिङ्गम्। समासः संक्षेपः। साधनस्य समास वचनं साधनसमासवचनम्। साधनग्रहणं तदाभासप्रतिषेधार्थम्। न हि तानि साधनं, संशयविपर्ययहेतुत्वात्। समासग्रहणम् अवयवान्तरम् अवकाशपदार्थम्। लिङ्गनिर्देशमात्रं हेतुः। यस्य साध्यसहभावित्वलक्षणः प्रपञ्च सो अवयवान्तराणि इत्युक्तं भवति।

उदाहरणन्तु अत्र निदर्शनं दृष्टान्तः। तस्य साधनस्य सहभावित्वनिदर्शनं यदसौ दृष्टान्तः। तद्यथा संहत्यकारिणां परार्थत्व दृष्टं, यथा शयनासनरथ-शरणानाम्। व्यतिरेकस्तु अवीतस्य प्रसङ्गि धर्मान्तरनिवृत्तिरूपत्वा अतदन्तर्भूत इति न तदर्थं वैधर्म्यदृष्टान्त उच्यते।

साध्यदृष्टान्तयोः एकक्रियोपसंहारः उपनयः। साध्यस्य चक्षुरादि-परार्थ्यलक्षणस्य दृष्टान्तस्य च शयनादेशेकक्रियोपसंहारः। तत्रार्थन्तर-भूतत्वात् साध्यदृष्टान्तायोरञ्जसा-नैकक्रियोपपद्यते। तेनैव तस्या अतिदर्शनादित्यतो धर्मसामान्यात् यथा इदं तथेदम् इत्येकक्रियो-पचर्यते। यथा शयनादयः संहतत्वात्परार्था वं चक्षुरादिभिः अपि परार्थैः भवितव्यम्। योऽसौ परः स पुरुषः।

तद्वाशात् प्रतिज्ञाभ्यासो निगमनम्। हेतुदृष्टान्तोपसंहारपेक्षया यः पुनः अभ्यासः तन्निगमनम्। तद्यथा तस्मात् अस्ति पुरुष इति एषाम् अवयवानां परस्परसम्बन्धाद् विशिष्टार्थः समुदायो वाक्यमित्यु-पदिश्यते। वाक्यम् अपि अनेकह यदा गुणीभूतस्वार्थम् अर्थान्तोपकारित्वादितरेण संसृज्यते, तदा शास्त्रम् अपि एकं वाक्यमिति अवसीयते।

एवम् अभिप्रायः - जिज्ञासादि अनभिधानम्। तद्व्यतिरेकेणापि स्वयम् अर्थगतेः। स्वनिश्चयवत् च परप्रतिपादनात्। यथा हि स्वयम् उत्पद्यते निश्चेतुः प्रत्ययः तथैव अन्यः प्रत्याय्य इति एतत् न्याय्यम्। न च स्वयमेवार्थं प्रतिपाद्यमानस्य जिज्ञासादीनां तत्र व्यापारः। तस्मात् परार्थमपि एषाम् उपादानं न कल्प्यते। संशयवचनम् अनर्थक्यञ्च, प्रतीतार्थत्वात्। निश्चितौ हि वादिप्रतिवादिनौ स्वपक्षयोः तयोः इतरेतरसंशयपर्यनुयोगे नास्ति प्रयोजनम्।

किञ्चित् अन्यत्-प्रयोजनकशक्यप्रास्यवचनं च। साधनाभ्युपगमादेव तत्प्रतीतेः। न हि महत्तां निष्प्रयोजना प्रवृत्तिरूपपद्यते। न चाशक्ये अर्थे हिमवत् समीकरणादिषु प्रवृत्तेः। तस्मात् अनर्थकं तदभिधानम्। तद्भावे भावादिति चेत् स्यात् एतत् सत्सु। जिज्ञासादिषु तत्वाधिगमं प्रति प्रवृत्तिः भवति, असत्सु न भवति। तस्मात् एतान्यपि साधनं भविष्यन्ति इति। एतत् च अनुपपन्नम्। कस्मात् ? अतिप्रसङ्गात्। सत्स्वान्मान्तः-करणेन्द्रियालोकविषयेषु प्रवृत्तिदर्शना-तेषामपि साधतत्वं स्यात्। अनिष्टञ्चैतत्। तस्मात् जिज्ञासादयो अनर्थकाः। प्रतिज्ञादयोः दुर्विहिताः। कथम् ? सध्यामिधायिनः प्रतिज्ञा अभ्युपगमाद् हेतुदृष्टान्तयोः अपि तत्प्रसङ्गः साध्यावधारणस्य अवयवान्तरेषु अपि उपपत्तेः।

यदि साध्यावधारणं प्रतिज्ञा इत्युच्यते, तेन साध्यस्य हेतोदृष्टान्तस्य वा यावदधारणं तदपि प्रतिज्ञात्वं प्राप्नोति, निमित्तविशेषात्। साध्यशब्दो ह्ययं सामान्यवृत्तिः। न यन्नमन्तरेण विशेषे अवस्थापयितुं शक्यत इति। किञ्च हेतुलक्षणानुपत्तिश्च, साधना अनुपदेशात्। यो हि साधन समासवचनं हेतुः इति एतत् लक्षणम् आचष्टे, तेन प्राकसाधनम् अभिधेयं स्यात्। ततो वक्तव्यमनुष्य समासवचनं हेतुः इति, न चैवमुक्तम्। तस्माद् लक्षणमेतत्।

किञ्चान्यत्-समासवचनं च विस्तर निषेधप्रसङ्गात्। यदि हि ससमासग्रहणं क्रियते किं प्राप्तं योऽयमाध्यान्मिकानां भेदानां कार्यकरणात्मकानां चैकजातिसमन्वयो दृष्टो इत्येवमादिः साधनप्रपञ्चः सो अहेतुः इत्युक्तं भवति। तस्मात् समासग्रहणम् अनिष्टम्। लिङ्गाभिधानाददोष इति चेत् स्यान्मतम्, लिङ्ग हिनः साधनम्। तस्य अत्र निर्देशः कृतः। तत्स्वतस्वमतिजाड्यादिदम् अनिष्टम् अध्यारोप्यते। न तु अस्मत् प्रमादादिति। एतत् अपि अयुक्तम्। कस्मात्? तस्य द्विधाभिन्नस्य पञ्चधा साधनभावात्। तद्धि लिङ्ग वीतावीतत्वेन इष्टम्। तेन द्विधा भिन्नम्। तत्रापि वीतः पञ्चप्रभेदः इत्यत्र समुदायान् निकृष्टस्य औकस्य लिङ्गत्वम् अशक्यं वक्तुमिति।

किञ्चान्यत्-दृष्टान्तलक्षमायोगश्च शब्दार्थलक्षणे अनिष्टप्रसङ्गात्। तन्निदर्शनं दृष्टान्त इति। अत्र शब्दो वा येन साध्यसाधने निर्देश्यते स दृष्टान्तः स्यात् ? अर्थो वा यत्र निर्दिश्यते ? किञ्चातः? तद्यदि तावत् शेषः परिगृह्यते, तत उपनयलक्षणं बाध्यते ? कस्मात् ? न हि यथा अभिमानं तथा साध्यमिति एकक्रिया युज्यते इति। अर्थाथः परिगृह्यते, तेनाभिधेयस्य वाक्यानवयत्वात् पञ्चावयवत्वविरोधः।

किञ्चान्यत्- दृष्टान्तोपनयनिमनाऽभेदश्च हेतुप्रतिज्ञार्थाविधानात्। साधनत्वमेव साध्यविना अभावित्वलक्षणं दृष्टान्तोपनययोः प्रत्याययते। प्रतिज्ञातार्थश्च निगमनस्य नावयवान्तरत्वं युज्यते।

उच्यते- यदुच्यते, स्वनिश्चयेनाङ्गभावावगमनात् परप्रत्यानार्थं जिज्ञासादि अनभिधानमिति त्र ब्रूमः- न उक्तत्वात्। उक्तमेतत् परस्त्वाद्याख्याङ्गं जिज्ञासादयः। सर्वस्य चानुग्रहः कर्तव्य इत्येवमर्थं शास्त्रव्याख्यानं विपश्चिद्भि प्रतीयते, न स्वार्थं स्वसदृश बुद्ध्यर्थं वा। तत्रैव कल्पमाने ये व्युत्पाद्यः तान्प्रति नैव एषाम् अनर्थलक्ष्यम्। अथ एतत् अनिष्टम् यदुक्तं सन्दिग्धविपर्यस्ताव्युत्पन्नबुद्धयनुग्रहार्थो हि सतां विनिश्चयः शास्त्रकथेति अस्य व्याघातः। किञ्चिनिवमाऽनभ्युपगमात्। न हि वयम् एषाम् आवश्यकम् अभिधानमाक्षमहे, किं तर्हिः यदा प्रतिवादी पर्यनुङ्केयु- किं जिज्ञासा इति अवश्यम् अभिधानीयं शब्दमिति। केन धर्मेण ? किं नित्योऽनित्य इति ? कुतः संशयः ? अमूर्तत्वात्। यस्तु न पर्यनुयुङ्क्ते न तं प्रत्येते वाच्याः। क्वचित् आनर्थक्यात् सर्वत्र प्रसङ्ग इति चेत् न, इतरेषाम् अपि तत्प्रसङ्गात्। प्रतिज्ञादीनाम् अपि तर्हि क्वचित् आनर्थक्यात् सर्वत्रावचनं प्रसज्यते। तथा च भवतोक्तं कस्यचित् तु किञ्चित् प्रसिद्धमेव भवति इति अन्यतरोक्तिरपि साधं भवति, शब्द इवार्थद्वयप्रतीत्वात् उभयानभिधानमिति। यद्यपि उक्तं निश्चितत्वात् संशयावचनमिति असदेतत्। कस्मात्? उक्तवान्। उक्तमेतत् सति पर्यनुयोगे तद्वचनमिति। एतेन प्रयोजन शक्यप्राप्तिप्रयुक्ते। यो हि पर्यनुयुञ्जीत किं प्रयोजनो अयं शक्यो वा अयमर्थ इति, तं प्रति वाच्यमेतत्।

यद्यपि उक्तं तद्भावे भावादिति न, अनभ्युपगमात्। न ब्रूमो यस्मात् सत्सु जिज्ञासादिषु तत्त्वाधिगमसद्भावः तस्मात् एतेषाम् अवयवत्वमिति। किं तर्हि ? यं प्रत्येषां, प्रतिपादवङ्गभावगमन्तं प्रत्येतानि साधनमिति।

यद्यपि उक्तं साध्याभिधायिनः प्रतिज्ञा अभ्युपगमात् हेतुदृष्टान्तयोः अपि तत्प्रसङ्ग इति, अयुक्तमेतत्। कस्मात् ? जिज्ञासादेः सद्भावे सति तत्प्रतीतिः। यद्यपि साध्यशब्दो अयम् विशेषेण सिद्धत्वात् अर्थान्तरम् आचष्टे, तथापि यं प्रति जिज्ञासासंशयप्रयोजन-शक्यप्राप्त यः तस्य व्युदस्य संशयं साध्यस्य अवधारणं प्रतिज्ञा, न हेतुदृष्टान्तयोः तदस्ति इति असह एतत्।

किञ्चान्यत्-तद्भावेऽविरोधात्। यदा तु जिज्ञासादयो हेतौ दृष्टान्ते वा भवन्ति तदा किं कृतकः शब्दो अथ न कृतको अथ बुद्धिर्नित्या क्षणिका वेति भवति एव तदवधारणं प्रतिज्ञा। यदपि उक्तम्- साधनानुपदेशात् हेतुलक्षणयोग इति। असदेतत्। कस्मात् ? लोकप्रसिद्धत्वात्। यथा साध्यवत्वेन इप्सितः पक्ष ति प्रतिज्ञालक्षणम् आचक्षणो भवान्न साध्यलक्षणमाचष्टे, कस्मात् ? साधनीयं साध्यमिति लोके सिद्धत्वात्, एवं साधनसमासवचनं हेतुलक्षणमाक्षणा वयं न साधनमाचक्षमहे। कस्मात् ? साध्यते अनेन इति कृत्वा साधनमिति लोके सिद्धत्वात्। उपेत्यवा अनुमाननिर्देशात्। लिङ्गं हिनः साधनं, तच्च निर्दिष्टमिति।

**पादटिप्पणी**

१.वे.परि., परि.-अनुमानः, पृ.-५५

२.वे.परि., परि.-अनुमानः, पृ.-५५

३.सांख्यकारिका-५, पृ.-२८

४.न्या.द.पृ.सं.-१११